Gujarat University Library, Ahmedabad

Gujarat University Library, Ahmedabad

॥ श्री ॥

श्रीगणेशाय नमः ॥ श्रीनारद उवाच ॥ यद्गुह्यं परमं लोके सर्व
रक्षैक रंजनं ॥ यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥१॥ श्री
ब्रह्मोवाच ॥ अस्ति गुह्यतमं विप्र सर्वभूतोपकारकं ॥ देव्यास्तु कव
चं पुण्यं तच्छृणुष्व महामुने ॥२॥ प्रथमं शैलपुत्रीति द्वितीयं ब्रह्मचारि
णी ॥ तृतीयं चंद्रघंटेति कुष्मांडेति चतुर्थकं ॥३॥ पंचमं स्कंदमाते
ति षष्ठं कात्यायिनीति च ॥ सप्तमं कालरात्रीश्च महागौरीति चाष्टमं ॥४॥
धि नवमं सिद्धिदा प्रोक्ता नवदुर्गाः प्रकीर्तिता ॥ उक्तान्येतानि नामानि ब्रह्म
णैव महात्मना ॥५॥ अग्निना दह्यमानास्तु शत्रुमध्ये गतो रणे ॥ विष
मे दुर्गमे चैव भयार्ताः शरणं गताः ॥६॥ न तेषां जायते किंचिदशुभं
रणसंकटे ॥ नापदं तस्य पश्यामि शोकदुःखभयं नहि ॥७॥ यैस्तु भ
क्त्या स्मृता नूनं तेषां सिद्धिः प्रजायते ॥ प्रेतसंस्था तु चामुंडा वाराहि

Gujarat University Library, Ahmedabad

महिषासना ८ ऐंद्री गजसमारूढा वैष्णवी गरुडासना माहेश्वरी
वृषारूढा कौमारी शिखिवाहना ९ ब्राह्मी हंससमारूढा सर्वा
भरणभूषिता । लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया १०
श्वेतरूपधरा देवी ईश्वरी वृषवाहना इत्येता मातरा सर्वा स
र्वयोगसमन्विता ११ श्रेष्ठैश्च मौक्तिकैः सर्वैर्दिव्यहारप्रलंबि
तिः इंद्रनीलैर्महानीलैः पद्मरागैः सुशोभनैः १२ नानाभरणशो
भाढ्या नानारत्नोपशोभिताः दृश्यंते रथमारूढा देव्यः क्रोध
समाकुलाः १३ शंखं च चक्रं गदां शक्तिं हलं च मुसलायुधं खेट
कं तोमरं चैव परशुं पाशमेव च १४ कुंतायुधं च खड्गं च गांडीवा
युधमुत्तमं दैत्यानां देहनाशाय भक्तानामभयाय च १५ धारयं
त्यायुधानीत्थं देवानां च हिताय वै । नमस्तेस्तु महारौद्रे महाघोरपरा
क्रमे १६ महाबले महोत्साहे महाभयविनाशिनि त्राहि मां दे

वीं दुःप्रेक्ष्यश्चरूक्ष्याणां त्र्यपविद्विधिनी ॥१७॥ प्राच्यां रक्षतु मामैंद्री आग्नेय्या
मग्निदेवता ॥ दक्षिणेऽवतु वाराहि नैरूत्यां खड्गधारिणी ॥१८॥ प्रतीच्यां
=पत्र वारुणी रक्षेद्वायव्यां मृगवाहिनी ॥ उदीच्यां रक्ष कौबेरी ईशान्यां शू चडि
लधारिणी ॥१९॥ ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद्वैष्णवी तथा ॥ एवं द
॥२॥ शदिशो रक्षेच्चामुंडा शववाहना ॥२०॥ जया मे चाग्रतस्पातु वि ॥२॥
जया पातु पृष्ठतः ॥ अजिता वामपार्श्वे तु दक्षिणे चापराजिता ॥
२१ ॥ शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥ मालाधरी ल
लाटे तु भ्रुवौ मे यशस्विनी ॥२२॥ त्रिनेत्रा च भ्रुवोर्वैव यम
घंटा च नासिके ॥ शंखिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी
॥२३॥ कपोलौ कालिका रक्षेत्कर्णमूले तु शंकरी ॥ नासिकाया
सुगंधा च उत्तरोष्ठे तु चर्चिका ॥२४॥ अधरे चामृतकला जिह्वा

Gujarat University Library, Ahmedabad

यांच सरस्वती ॥ दंतान् रक्षतु कौमारी कंठदेसे तु चंडिका २५
घंटिकां चित्रघंटा च महामाया च तालुके ॥ कामाक्षी चिबुकं
रक्षेद्वाचं मे सर्वमंगला: २६ ग्रीवायां भद्रकाली च पृष्ठवं
शे धनुर्धरी ॥ नीलग्रीवा बहि:कंठे नलिकां नलकूबरी ॥ २७
खड्गधारिण्युभौ स्कंधौ बाहु मे वज्रधारिणी ॥ हस्तौ मे दंडिनी रक्षेदंबि
का चांगुलीषु च ॥ २८ नखान् शूलेश्वरी रक्षेत्कुक्षौ रक्षेन्नलेश्वरी
॥ स्तनौ रक्षेन्महादेवी मन:शोकविनाशिनी २९ हृदये ललिता
देवी उदरे शूलधारिणी ॥ नाभौ च कामिनी रक्षेद्गुह्यं गुह्ये
श्वरी तथा ३० भूतानां नाभिका मेढ्रं ऊरू मे मेघवाहिनी ॥ जंघे म
हाबला प्रोक्ता जानुनी विंध्यवासिनी ३१ गुल्फयोर्नारसिं
हि च पादपृष्ठमितौजसि पादांगुलि श्री मे रक्षेत्पादौ चानल

Gujarat University Library, Ahmedabad

बो

वासिनी ३२ इंद्राक्षा कराली कौ रुद्रोत्कर्षा चौबोर्ध कोशिनी ॥ सोम रूपे
शुकी माहेश्वरी चं वाजेश्वरित था ॥ ३३ रक्तम ज्ञाव सामांसा मस्थिमे
हांसि पार्वती ॥ अंत्रानि कालरात्रीच अपि नं चमुकुरेश्वरी ॥ ३४
पद्मावती पद्म कोशिक कफे चउमरीत था ॥ ज्वालामुखी सतथा ज्वा
लो अन्ने वा सर्व संधिषु ३५ शुक्रं ब्रह्माणि मे रक्षेत्छायां छत्रे
३ श्वरी तथा ॥ अहंकारं मनो बुद्धिं रक्ष मे धर्म धारिणी ३६ प्राणापा ३
नौ तथा व्याना उदान च समानसः ॥ वज्रहस्ता तु मे रक्षेत्प्राण
कल्याण शोभने ॥ ३७ रसे रूपे च गंधे च शब्दे स्पर्शे च योगिनी
सत्वं रजस्तम चैव रक्षेन्नारायिनी सदा ३८ आयु रक्षेत्तु
वाराहि धर्मं रक्षत्तु वैष्णवी ॥ यशःकीर्तिं च लक्ष्मीं च सदा
रक्षतु वैष्णवी ॥ ३९ गोत्रमिंद्राणि मे रक्षेत्पशून्मे रक्ष चंडि

Gujarat University Library, Ahmedabad

का पुत्रान्र रक्षेन्महालक्ष्मी भार्यां रक्षतु भैरवी ४० मार्गं
क्षेमंकरी रक्षेद्विजया सर्वतस्थिता कलेवैतालकुरि रक्षेत्का
लिका प्राणान् संशये ४१ आयुर्मे सर्वदा रक्षेन्मनुष्य रक्षेन्महेश्व
री रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ४२ तत्सर्वं रक्ष मे देवी
जयंती पापनाशनी रक्ष मे सर्वगात्राणि दुर्गे दुर्गतिनाशनी ४३ पदमे
कं न गच्छेत्तु यदिच्छेच्छुभमात्मनः कवचेनावृतो नित्यं यत्र यत्रैव
गच्छति ४४ तत्र तत्रार्थलाभश्च विजयः सर्वकामिकः यंयं
चिंतयते कामं तंतं प्राप्नोति निश्चितं ४५ परमैश्वर्यमतु
लं जायते निर्भयः पुमान् इदं तु देव्याः कवचं देवानामपि दु
र्लभं ४६ यः पठेत्प्रयतो नित्यं त्रिसंध्यं श्रद्धयान्वितं दैवीकला भ
वेत्तस्य त्रैलोक्ये चापराजितः ४७ जीवेद्वर्षशतं साग्रमपमृत्युवि

वर्जिते न स्पृशंति व्याधयः सर्वे भूतादि विस्फोटकादयः ॥४८॥ स्थाव
रं जंगमं चैव कृत्रिमं चापि यद्विषं ॥ नश्यंति चाराणि सर्वाणि
६ मंत्रयंत्राणि भूतले ॥४९॥ न च खेचराश्चैव कुलनाशोपदूतिका
॥ सहजा कुलजा माला डाकिनी शाकिनी तथा ॥५०॥ अंतरि
खेचरा घोरा डाकिन्यश्च महाबला ग्रहभूतपिशाचाश्च यक्ष
गंधर्वराक्षसा ॥५१॥ ब्रह्मराक्षसवेताला कूष्मांडा भैरवादयः ॥ ८
नश्यंति दर्शनात्तस्य कवचे हृदि संस्थिते ॥५२॥ मानोन्नतिर्भवे
द्राज्ञां तेजोवृद्धिकरं परं यशसा वर्धते सोपि कीर्तिमंडितभू
तले ॥५३॥ जपेत्सप्तशतिं चंड्याः कृत्वा तु कवचं पुरा ॥ यावद्भू
मंडलं धत्ते सशैलवनकानने ॥५४॥ तावत्तिष्ठति मेदिन्यां सं
ततिः पुत्रपौत्रकी ॥ देहांते परमं स्थानं यत्सुरैरपि दुर्लभं ॥५५
प्राप्नोति पुरुषो नित्यं महामायाप्रभावतः ॥ मनसा चिंतितं कार्यं

Gujarat University Library, Ahmedabad

तस्माद्वैं सप्रकृतं जनेदं ५६ ॥ इति वाराहपुराणे हरिहरब्रह्मक
वचं संपूर्णम् ॥ ॐ नमश्चंडिकायै ॥ ऋषिरुवाच ॥ या काचिद्वि
धा स्थाना सप्तधा सैव कीर्तिता । तस्या भेदा ह्यनंताश्च तमला
म्यं शुभं वद ॥ १ ॥ या देवी स्तूयते नित्यं विबुधैर्वेदपारगैः । सामे पव
तु जिह्वाग्रे ब्रह्मरूपा सरस्वती ॥ २ ॥ जयंती मंगला काली भद्रकाली
कपालिनि । दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु ते ॥ ३ ॥ मधु
कैटभविनाशि विधात्रे वरदे नमः । रूपं देहि जयं देहि यशो देहि
द्विषो जहि ॥ ४ ॥ महिषासुरविद्रावविधात्रे वरदे नमः । रूपं देहि० ५
शुंभस्य च निशुंभस्य धूम्राक्षस्य च मर्द्दिनि । रूपं देहि ॥ ६ ॥ रक्त
मा बीजवधे देवि चंडमुंडविनाशिनि । रूपं देहि ॥ ७ ॥ वंदितांघ्रियुगे देवि
देवि सौभाग्यदायिनी ॥ रूपं देहि० ॥ ८ ॥ अचिंत्यरूपचरि
ते सर्वशत्रुविनाशिनी । रूपं देहि० ॥ ९ ॥ नतेभ्यः सर्वदा भक्त्या चं

Gujarat University Library, Ahmedabad

२ चतुर्भुजे चतुर्वक्त्र संस्तुते परमेश्वरी० रूपं देहि० २०

डिके दुरितापहे रूपं देहि० १० स्तुवद्भ्यो भक्तिपूर्वं त्वां चंडिके
व्याधिनाशिनि रूपं देहि० ११ चंडिके संततं ये त्वामर्चयंतीह
भक्तितः रूपं देहि० १२ देहि सौभाग्यमारोग्यं देहि देवि परं सुखं
रूपं देहि० १३ विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः रूपं
५ देहि० १४ विधेहि देवि कल्याणं विधेहि विपुलां श्रियं रूपं
देहि० १५ सुरासुरशिरोरत्ननिघृष्टचरणांबुजे रूपं देहि
१६ विद्यावंतं यशस्वंतं लक्ष्मीवंतं जनं कुरु रूपं देहि० १७
प्रचंडदैत्यदर्पघ्ने चंडिके प्रणताय मे रूपं देहि० १८ कृष्णेन ५
संस्तुते देवि शश्वद्भक्त्या सदांबिके रूपं देहि० १९ हिमाचल
सुतानाथसंस्तुते परमेश्वरि० रूपं देहि० २१ इंद्राणीप
तिसद्भावपूजिते परमेश्वरी रूपं देहि० २२ देवि प्रचंडदोर्दं
डदैत्यदर्पविनाशिनी० रूपं देहि० २३ देवि भक्तजनोद्दाम

Gujarat University Library, Ahmedabad



स्तानं देहि देवि के रूपं देहि० २४ स्तौमि ध्यानपदो नित्यं वसा ह
शुभ हरा नव: रूपं देहि० २५ पत्निं मनोरमां देहि मनोवृत्तानु
सारिणीं तारिणीं दुर्गसंसारसागरस्य कुलोद्भवां २६ इदं
स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नर: स तु सप्तशती संख्यावर
माप्नोति मानव: २७ इति श्रीमार्कंडेयपुराणे अर्गला स्तोत्रं स
माप्तं विशुद्धज्ञानदेहाय त्रिवेदी दिव्यचक्षुषे श्रेय: प्राप्तिनि
मित्ताय नम: सोमार्द्धधारिणे १ सर्वमेतद्विजानीयान्मंत्राणा
मभिकीलकं सोपि क्षेममवाप्नोति सततं जाप्यतत्पर: २ सि
ध्यंत्युच्चाटनादीनि वस्तूनि सकलान्यपि एतेन स्तुवतां
देवी स्तोत्रमात्रेण सिध्यति ३ न मंत्रं नौषधं तस्य न किंचि
दपि विद्यते विना जाप्येन सिध्यंत सर्वमुच्चाटनादिकं ४
समग्राण्यपि सिध्यंति लोकशंकामिमां हर: कृत्वा निमंत्र
यामास सर्वमेवमिदं शुभं ५ स्तोत्रं वै चंडिकायास्तु तस्य

६ गुह्यं चकारणः समाप्नोति स पुत्स्येन तां यथावन्नियंत्र सा ह
सोपि देशमवाप्नोति सर्वमेव न संशयः कलायां वा चतुर्द
श्यां मष्टम्यां वा समाहितः ७ इत्याति प्रतिग्रहाति नामधेयं मा
प्रसिष्यति इत्थं रूपेण कीलेन मोहादेवैन कीलितं ८ योनिः
कीलां विद्यायेनां नि संजपति स्फुटं स सिद्धः सगणाः सो
पि गंधर्वो जायते ध्रुवं ९ न चैवाप्यटतस्तस्य भयं क्वापि प्र
जायते नास्य मृत्युवशं याति मृतो मोक्षमवाप्नुयात् १० ज्ञात्वा
प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ततो ज्ञात्वैव संपन्न
मिदं प्रारभ्यते बुधैः ११ सो नागमादिच यत्किंचिद्दृश्यते जल
नाजनैः तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं सदा १२ शनैः कु
जपमाने स्मिन्न स्तोत्रं संपत्तिरुच्चकैः भवत्येव समग्रापि
ततः प्रारभ्यमेव तत् १३ रोर्ध्वं यं यत्प्रसादेन सौभाग्यादी ६

ष्पसंपद राज्यहानिःपरो मोहः स्तूयते सा न किं जनैः १४
इति श्रीमायोनरे स्वापंनुवे श्रीमार्कंडेयोक्तं भगवत्याः की
लक स्तोत्रं संपूर्णं यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया य
शुद्धमशुद्धं वा मम दोषो न दीयते १ श्रीगणेशाय नमः ॐ नमः श्री
चंडिकायै नमः श्रीमार्कंडेय उवाच सावर्णिः सूर्यतनयो योम
नुः कथ्यतेऽष्टमः निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥१॥ महा
मायानुभावेन यथा मन्वंतराधिपः स बभूव महाभागः सावर्णि
स्तनयो रवेः २ स्वारोचिषेंतरे पूर्वं चैत्रवंशसमुद्भवः सुरथो
नाम राजाभूत्समस्ते क्षितिमंडले ३ तस्य पालयतः सम्यक्
प्रजाः पुत्रानिवौरसान् बभूवुः शत्रवो भूपाः कोलाविध्वं
सिनस्तदा ४ तस्य तैरभवद्युद्धमतिप्रबलदंडिनः न्यूनैर
पि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ५ ततः स्वपुरमायातो निज
देशाधिपोऽभवत् आक्रांतः स महाभागस्तैस्तदा प्रबलारिभिः ६

Gujarat University Library, Ahmedabad

श्रमात्मैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः कोशो बलं चापहृतं
तत्रापि स्वपुरे ततः ७ ततो मृगयाव्याजेन हृतस्वाम्यः संभ्र
मतिः राकाकीर्णमारुह्य जगाम गहनं वनं ८ स तत्राश्र ७
ममद्राक्षीद् द्विजवर्यस्य मेधसः प्रशांतस्वापदाकीर्णं मुनिशि
ष्योपशोभितं ९ तस्थौ कंचित्स कालं च मुनिना तेन सत्कृ
तः इतश्चेतश्च विचरंस्तस्मिन्मुनिवराश्रमे १० सोऽचिंतय
त्तदा तत्र ममत्वाकृष्टचेतनः मत्पूर्वैः पालितं पूर्वं मया हीनं
पुरं हि तत् ११ मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा न जाने
स प्रधानो मे शूरहस्ती सदामदः १२ मम वैरिवशं यातः का
न्भोगानुपलप्स्यते ये ममानुगता नित्यं प्रसादधनभोज
त्रिं नैः १३ अनुवृत्तिं ध्रुवं तेऽद्य कुर्वंत्यन्यमहीभृतां असम्यग्व
यशीलैस्तैः कुर्वद्भिः सततं व्ययं १४ संचितः सोऽतिदुःखेन

Gujarat University Library, Ahmedabad

क्षयं कोशो गमिष्यति एतच्चान्य सततं चिंतयामास पार्थिव १५
तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः स पृष्टस्तेन कस्त्वं भो
हेतुश्चागमनेत्र कः १६ सशोक इव कस्मात्वं दुर्मना इव लक्ष
स्यसे इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितं १७ प्रत्युवाच
प्र स तं वैश्यः प्रश्रयावनतो नृपं वैश्य उवाच समाधिर्नाम वैश्यो
हमुत्पन्नो धनिनां कुले १८ पुत्रदारैर्निरस्तश्च धनलोभादसा
धुभिः विहीनः स धनैर्दारैः पुत्रैरादाय मे धनं १९ वनमभ्याग
तो दुःखी निरस्तश्चाप्तबंधुभिः सोहं न वेद्मि पुत्राणां कुशलाकु
शलात्मिकां २० प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः
किं नु तेषां गृहे क्षेममक्षेमं किं नु सांप्रतं २१ कथं ते किं नु सद्वृ
त्ता दुर्वृत्ताः किं नु मे सुताः राजोवाच यैर्निरस्तो भवाल्लुब्धैः
पुत्रदारादिभिर्धनैः २२ तेषु किं भवतः स्नेहमनुबध्नाति मा

Gujarat University Library, Ahmedabad

न

नसं वैश्य उवाच एवमेतद्यथा प्राह भवानस्मद्गतं वच
२३ किं करोमि न बध्नाति मम निष्ठुरतां मनः येः संत्यज्य पितृ
स्नेहं धनलुब्धैर्निराकृतः २४ पतिः स्वजनहार्दं च हार्दि तेष्वे
व मे मनः किमेतन्नाभिजानामि जानन्नपि महामते २५ य
त्प्रेमप्रवणं चित्तं विगुणेष्वपि बंधुषु तेषां कृते मे निःश्वासो
दौर्मनस्यं च जायते २६ करोमि किं यन्न मनस्तेष्वप्रीतिषु नि
ष्ठुरं मार्कंडेय उवाच २७ ततस्तौ सहितौ विप्र तं मुनिं समुप
स्थितौ समाधिर्नाम वैश्यो सौ स च पार्थिवसत्तमः २८ कृ
त्वा तु तौ यथान्यायं यथार्हं तेन संविदं उपविष्टौ कथाः का
श्चिच्चक्रतुर्वैश्यपार्थिवौ २९ राजोवाच भगवंस्त्वाम
हं प्रष्टुमिच्छाम्येकं वदस्व तत् दुःखाय यन्मे मनसः स्वचि

व

त्तायत्ततांविना ३० ममत्वंममराज्यस्यराज्यंगेष्वखिले
ष्वपिजानतोपियथाज्ञस्यकिमेतन्मुनिसत्तमः ३१ अयं
चनिःकृतःपुत्रैर्दारैर्भृत्यैस्तथोज्झितः स्वजनेनचसंत्यक्त
स्तेषुहार्दीतथाप्यति ३२ एवमेषतथाहंचद्वावप्यत्यंतदुः
खितौ दृष्टदोषेपिविषयेममत्वाकृष्टमानसौ ३३ तत्के
नैतन्महाभागयन्मोहोज्ञानिनोपि ममास्यचभवत्ये
षाविवेकांधस्यमूढता ३४ ऋषिरुवाच ज्ञानमस्ति
समस्तस्यजंतोर्विषयगोचरे विषयश्चमहाभाग
९ यांतिचैवंपृथक्पृथक् ३५ दिवांधाःप्राणिनःकेचिद्

Gujarat University Library, Ahmedabad

॥२॥ त्रावंधास्तथापरे॥ केचिद्दिवातथारात्रौप्राणिनस्तुल्यदृष्ट ॥२॥
यः॥३६॥ज्ञानिनोमनुजाःसत्यंकिंतुतेनहिकेवलं॥यतो
हिज्ञानिनःसर्वेपशुपक्षिमृगादयः॥३७॥ज्ञानंचतन्मनु
ष्याणांयत्तेषांमृगपक्षिणां॥मनुष्याणांचयत्तेषांतुल्यम
न्यत्तथोभयोः॥३८॥ज्ञानेपिसतिपश्यैतान्पतगांछाव
चंचुषु॥कणमोक्षादृतान्मोहात्पीड्यमानानपिक्षुधा
॥३९॥मानुषामनुजव्याघ्रसाभिलाषाःसुतान्प्रति॥लोभा
त्प्रत्युपकारायनन्वेतेकिंनपश्यसि॥४०॥तथापिमम
तावर्तेमोहगर्तेनिपातिताः॥महामायाप्रभावेनसंसा

Gujarat University Library, Ahmedabad

रस्थितिकारिणः ॥ ५१ ॥ तन्नात्रविस्मयः कार्यो योगनि
द्राजगत्पतेः महामायाहरेश्चैषा तयासंमोह्यते जग
त् ॥ ५२ ॥ ज्ञानिनामपि चेतांसि देवी भगवती हि सा बला
दाकृष्य मोहाय महामाया प्रयच्छति ॥ ५३ ॥ तया विसृज्यते
विश्वं जगदेतच्चराचरं सैषा प्रसन्ना वरदा नृणां भवति
मुक्तये ॥ ५४ ॥ सा विद्या परमा मुक्तेर्हेतुभूता सनातनी सं
सारबंधहेतुश्च सैव सर्वेश्वरेश्वरि ॥ ५५ ॥ राजोवाच
भगवान्काहि सा देवी महामायेति यां भवान् ब्रवीति क

Gujarat University Library, Ahmedabad

ॐ

समुत्पन्ना सा कर्मास्याश्च किं द्विज ॥ ६६ ॥ यत्स्वभावा च सा
ही वीर्यत्स्वरूपा यदुद्भवा ॥ तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्र
वा०दु० ह्मविदांवर ॥ ६७ ॥ ऋषिरुवाच ॥ नित्यैव सा जगन्मूर्त्ति
१० स्तया सर्वमिदं ततं ॥ तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां म
म ॥ देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥ उत्पन्ने
ति तदा लोके सा नित्याप्यभिधीयते ॥ ६८ ॥ योगनिद्रां यदा
विष्णुर्जगत्येकार्णवीकृते ॥ आस्तीर्य शेषमभजत्कल्पां
ते भगवान्प्रभु ॥ ७० ॥ तदा द्वावसुरौ घोरौ विख्यातौ मधु १०
कैटभौ ॥ विष्णुकर्णमलोद्भूतौ हंतुं ब्रह्माणमुद्यतौ ॥ ७१ ॥

Gujarat University Library, Ahmedabad

सनाभिकमलेविष्णोः स्थितोब्रह्माप्रजापतिः दृष्ट्वाताव
सुरौचोग्रौप्रसुप्तंचजनार्दनं ॥५२॥ तुष्टावयोगनिद्रांता
मेकाग्रहृदयस्थितः ॥ विबोधनार्थायहरेर्हरिनेत्रकृ
तालयां ॥५३॥ विश्वेश्वरीजगद्धात्रीस्थितिसंहारकारि
णीं ॥ निद्रांभगवतींविष्णोरतुलांतेजसःप्रभुः ॥५४॥ ब्रह्मो
वाच ॥ त्वंस्वाहात्वंस्वधात्वंहिवषट्कारःस्वरात्मिका २९
सुधात्वमक्षरेनित्येत्रिधामात्रात्मिकास्थिता ॥५५॥
अर्धमात्रास्थितानित्यायानुच्चार्याविशेषतः त्वमेव
संध्यासावित्रीत्वंदेवीजननीपरा ॥५६॥ त्वयैतद्धा
र्यतेविश्वंत्वयैतत्सृज्यतेजगत् त्वयैतत्पाल्यतेदेवि

Gujarat University Library, Ahmedabad

त्वमत्स्यंते च सर्वदा ॥ ५७ ॥ विसृष्टौ सृष्टिरूपा त्वं स्थितिरू
पा च पालने ॥ तथा संहृतिरूपांते जगतोस्य जगन्मये
॥ ५८ ॥ महाविद्या महामाया महामेधा महास्मृतिः ॥ महा
११ मोहा च भवती महादेवी महासुरी ॥ ५९ ॥ प्रकृतिस्त्वं च
सर्वस्य गुणत्रयविभाविनी ॥ कालरात्रिर्महारात्रिर्मो १२
हरात्रिश्च दारुणा ॥ ६० ॥ त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं
बुद्धिर्बोधलक्षणा ॥ लज्जा पुष्टिस्तथा तुष्टिस्त्वं शांतिः
क्षांतिरेव च ॥ ६१ ॥ खड्गिनी शूलिनी घोरा गदिनी च
क्रिणी तथा ॥ शंखिनी चापिनी बाणाभुशुंडीपरि
घायुधा ॥ ६२ ॥ सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुं

Gujarat University Library, Ahmedabad

रंरी ॥ परमा पराणां परमा त्वमेव परमेश्वरी ॥६३॥ यच्च किंचि
त्क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥ तस्य सर्वस्य या
शक्तिः सा त्वं किं स्तूयसे तदा ॥६४॥ यया त्वया जगत्स्र
ष्टा जगत्पात्यत्ति यो जगत् ॥ सोपि निद्रावशं नितः कस्त्वं
स्तोतुमिहेश्वरीः ॥६५॥ विष्णुः शरीरग्रहणमहमीशान
५ एव च ॥ कारितास्ते यतो तस्त्वां कः स्तोतुं शक्तिमान्भवेत्
॥६६॥ सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥ मोहयै
तौ दुराधर्षावसुरौ मधुकैटभौ ॥६७॥ प्रबोधं च जगत्स्वा
मी नियतामच्युतो लघु ॥ बोधश्च क्रियतामस्य हंतुमे
तौ महासुरौ ॥६८॥ ऋषिरुवाच ॥ एवं स्तुता तदा देवी

Gujarat University Library, Ahmedabad

तामसी तत्र वेधसा ॥ विष्णोः प्रबोधनार्थाय निहंतुं मधु
कैटभौ ॥६९॥ नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः
निर्गम्य दर्शने तस्थौ ब्रह्मणो व्यक्तजन्मनः ॥७०॥ उत्तस्थौ च
१२ जगन्नाथस्तया मुक्तो जनार्दनः ॥ एकार्णवे हिशयनात्ततः
स ददृशे च तौ ॥७१॥ मधुकैटभौ दुरात्मानावतिवीर्यपराक्र
मौ ॥ क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ॥७२॥ समुत्था
य ततस्ताभ्यां युयुधे भगवान्हरिः ॥ पंचवर्षसहस्राणि बा
हुप्रहरणो विभुः ॥७३॥ तावप्यतिबलोन्मत्तौ महामायाविमो
हितौ ॥ उक्तवंतौ वरोस्मत्तो व्रियतामिति केशवं ॥७४॥ श्री १२
भगवानुवाच ॥ भवेतामद्य मे तुष्टौ मम वध्यावुभावपि
किमन्येन वरेणात्र एतावद्धि वृतं मम ॥७५॥ ऋषिरुवाच

Gujarat University Library, Ahmedabad

वंचिताभ्यामिति तदा सर्वमापोमयं जगत् विलोक्य ताभ्यां
गदितो भगवान् कमलेक्षणः ७६ प्रीतौ स्वस्तव युद्धेन श्लाघ्य
स्त्वं मृत्युरावयोः आवां जहि न यत्रोर्वी सलिलेन परिप्लुता
७७ ऋषिरुवाच तथेत्युक्त्वा भगवता शंखचक्रगदाभृ
ता कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः ७८ ए
वमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयं प्रभावमस्या देव्या
स्तु भूयः शृणु वदामि ते ७९ इति श्रीमार्कंडेयपुराणे सा
वर्णिके मन्वंतरे देवीमहात्म्ये मधुकैटभवधः मध्यमचरि
तस्य विष्णुरृषिः उष्णिक् छंदः महालक्ष्मीर्देवता शुनश्री
कः ह्रीं बीजं वायुस्तत्वं यजुर्वेदः जपे विनियोगः अथ ध्यानम

Gujarat University Library, Ahmedabad

थमचरितं॥ ऋषिरुवाच देवासुरमभूद्युद्धं पूर्णम
ब्दशतंपुरा महिषेसुराणामधिपे देवानांचपुरंदरे १ तत्रा
सुरैर्महावीर्यैर्देवसैन्यंपराजितं जित्वाचसकलान्देवानिं
१३ द्रोभून्महिषासुरः २ ततःपराजितादेवाःपद्मयोनिंप्रजापतिं
पुरस्कृत्यगतास्तत्रयत्रेशगरुडध्वजौ ३ यथावृत्तंतयोस्त द्व
न्महिषासुरचेष्टितं त्रिदशाःकथयामासुर्देवाभिभवविस्तरं ४
सूर्येंद्राग्न्यनिलेंदूनांयमस्यवरुणस्यच अन्येषांचाधिकारान्
सस्वयमेवाधितिष्टति ५ स्वर्गान्निराकृताःसर्वेतेनदेवगणाभु
विचरंतियथामर्त्यामहिषेणदुरात्मना ६ एतद्वःकथितंसर्वम १३
मरारिविचेष्टितं शरणंवःप्रपन्नास्मोवधस्तस्यविचिंत्यतां ७
इत्थंनिशम्यदेवानांवचांसिमधुसूदनः चकारकोपंशंभुश्च

Gujarat University Library, Ahmedabad

भ्रकुटीकुटिलाननात् ८ ततोतिकोपपूर्णस्य चक्रिणो वदनात्ततः
निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च ९ अन्येषां चैव देवानां
शक्रादीनां शरीरतः निर्गतं सुमहत्तेजस्तच्चैक्यं समगछत १०
अतीव तेजसः कूटं ज्वलंतमिव पर्वतं ददृशुस्ते सुरास्तत्र ज्वा
लाव्याप्तदिगंतरं ११ अतुलं तत्र तत्तेजः सर्वदेवशरीरजं एकस्थं
तदभून्नारी व्याप्तलोकत्रयं त्विषा १२ यदभूच्छांभवं तेजस्तेना
जायत तन्मुखं याम्येन चाभवन्केशा बाहवो विष्णुतेजसा
१३ सौम्येन स्तनयोर्युग्मं मध्यं चैंद्रेण चाभवत् वारुणेन
च जंघोरू नितंबस्तेजसा भुवः १४ ब्रह्मणस्तेजसा पादौ
तदंगुल्योर्कतेजसा वसूनां च करांगुल्यः कौबेरेण नासि
का १५ तस्यास्तु दंताः संभूताः प्राजापत्येन तेजसा नयनत्रि

तयं जज्ञे तथा पावकतेजसा १६ भ्रुवौ च संध्ययोस्तेजः श्र
वणावनिलस्य च अन्येषां चैव देवानां संभवस्तेजसां शिवा
१७ ततः समस्तदेवानां तेजोराशिसमुद्भवां तां विलोक्य मुदं
१४ प्रापुरमरा महिषार्दिताः १८ शूलं शूलाद्विनिष्कृष्य ददौ तस्यै
पिनाकधृक् चक्रं च दत्तवान् कृष्णः समुत्पाद्य स्वचक्रतः १९
शंखं च वरुणः शक्तिं ददौ तस्यै हुताशनः मारुतो दत्तवांश्चा
पं बाणपूर्णे तथेषुधी २० वज्रमिंद्रः समुत्पाद्य कुलिशादम
राधिपः ददौ तस्यै सहस्राक्षो घंटामैरावतात् गजात् २१ दु
कालदंडाद्यमो दंडं पाशं चांबुपतिर्ददौ प्रजापतिश्चाक्ष
मालां ददौ ब्रह्मा कमंडलुं २२ समस्तरोमकूपेषु निजरश्मी

नदिवाकरः कालश्च रत्नवान स्वर्णं तस्याश्च मेचनिर्मलं २३
क्षीरोदश्चामलं हारमजरे च तथांबरे चूडामणिं तथादि
व्यं कुंडले करकांतिच २४ अर्द्धचंद्रं तथा शुभ्रं केयूरान्
सर्वबाहुषु नूपुरौ विमलौ तद्ग्रैवेयकमनुत्तमं २५ अं
गुलीयकरत्नानि समस्तास्वंगुलीषु च विश्वकर्मा ददौ त
स्यै परशुं चातिनिर्मलं २६ अस्त्राण्यनेकरूपाणि तथा
भेद्यं च दशनं अम्लानपंकजां मालां शिरसुरसि चाप
रां २७ अददज्जलधिस्तस्यै पंकजं चातिशोभनं
हिमवान्वाहनं सिंहं रत्नानि विविधानि च २८ ददाव
शून्यं सुरया पानपात्रं धनाधिपः शेषश्च सर्वनागेशो
Gujarat University Library, Ahmedabad

महामतिविलक्षितं २९ नागनाहंहसौ तस्मै धुनेयः
पृथिवीमिमां अमैरपि सुरैर्देवीः शत्रैलोक्य युधैस्तथा
३० संमानितानवाशेषैः साटकासंयुक्तमुकुटः तस्मानो
देवघोटेरु कु-समापरितं नमः ३१

Gujarat University Library, Ahmedabad